क्षीरमेतदिदमुत्तमोत्तमं प्राज्यमाज्यमिदमुज्ज्वलं मधु।

मातेरेतदमृतोपमं त्वया संभ्रमेण परिपीयतां मुहुः ॥

साङ्गायै सपरिवारायै सीतायै नमः । पूर्वापोशानं समर्पयामि ॥

इस मन्त्र से माता को पूर्वापोशान के लिए जल अर्पित करे।

पानीय जल-

सुवासितं शीतलं च पिपासानाशकारणम्। जगज्जीवनरूपं च जीवनं देवि गृह्यताम् ॥

साङ्गायै सपरिवारायै सीतायै नमः । पानीय जलं समर्पयामि ॥

इस मन्त्र से माता को पीने के लिए जल अर्पित करे।

उत्तरापोशान-

कर्पूरसौगन्ध्यसमन्वितं देवि ! सुजाह्नवीतीर्थं समाहृतं मुदा ॥

सुशीतलं प्रीतिकरं सुनिर्मलं ह्यपोशनं चोत्तरकं गृहाण ॥

साङ्गायै सपरिवारायै सीतायै नमः । उत्तरापोशानं समर्पयामि ॥

इस मन्त्र से माता को उत्तरापोशान के लिए जल अर्पित करे।

हस्तप्रक्षालनादि-

साङ्गायै सपरिवारायै सीतायै नमः । हस्तप्रक्षालनार्थं जलं समर्पयामि,

मुखप्रक्षालनार्थं जलं समर्पयामि, आचमनं समर्पयामि ॥

अब माता को करोद्वर्तन समर्पित करे।

करोद्वर्तन-

उष्णोदकैः पाणियुगं मुखं च प्रक्षाल्य मातः कलधौतपात्रे ।

कर्पूर मिश्रेण सकुंकुमेन हस्तौ समुद्वर्तय चन्दनेन ॥

साङ्गायै सपरिवारायै सीतायै नमः । करोद्वर्तनार्थे चन्दनं समर्पयामि॥

इस मन्त्र से अपने दाएँ हाथ को ऊपर तथा बाएँ को नीचे करके दोनो हाथो की अनामिका और अंगूठे से देवी को घिसा हुआ गीला चंदन अर्पित करे, पहले अपने दाएँ हाथ से देवी के दाएँ हाथ पर चन्दन अर्पित करे फिर अपने बाएँ हाथ से देवी के बाएँ हाथ पर चन्दन अर्पित करे॥

फल-

फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् । तस्मात् फलप्रदानेन पूर्णाः सन्तु मनोरथाः ॥

साङ्गायै सपरिवारायै सीतायै नमः । फलं समर्पयामि ॥

इस मन्त्र से माता को फल अर्पित करे।

ताम्बूल-

ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम् । जिह्वाजाड्यच्छेदकरं ताम्बूलं देवि गृह्यताम् ॥

साङ्गायै सपरिवारायै सीतायै नमः । ताम्बूलं समर्पयामि ॥

इस मन्त्र से माता को ताम्बूल अर्पित करे।

दक्षिणा-

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

साङ्गायै सपरिवारायै सीतायै नमः । दक्षिणां समर्पयामि ॥

इस मन्त्र से माता को दक्षिणा अर्पित करे।

छत्र-

चक्रवर्तिप्रिये छत्रं चन्द्रमण्डलसन्निभम् । धारये ते सर्वरत्नजालकं सुखमास्यताम् ॥

साङ्गायै सपरिवारायै सीतायै नमः । छत्रं समर्पयामि ॥

इस मन्त्र से माता को छत्र अर्पित करे।

चामर-

चामरं हे महादेवि ! चमरीपुच्छनिर्मितम् । गृहीत्वा पापराशीनां खण्डनं सर्वदा कुरु ॥

साङ्गायै सपरिवारायै सीतायै नमः । चामरं समर्पयामि ॥

इस मन्त्र से माता को दो चामर अर्पित करे।

तालवृन्त-

रौप्येण दण्डेन युतेन शब्दैर्युक्तेन वै रौप्यसुकिङ्किणीनाम् ।

सुतालवृत्तेन तवाङ्गकानि मातः ! सुमन्दं परिवीजयामि ॥

साङ्गायै सपरिवारायै सीतायै नमः । तालवृन्तं समर्पयामि ॥

इस मन्त्र से माता को पंखा अर्पित करे।

दर्पण-

दर्पणं विमलं रम्यं शुद्धबिम्बप्रदायकम् । आत्मबिम्बप्रदर्शार्थमर्पयामि महेश्वरि ! ॥

साङ्गायै सपरिवारायै सीतायै नमः । दर्पणं दर्शयामि ॥

इस मन्त्र से माता को दर्पण दिखाए।

अब माता को शिबिका अर्पित करे।

शिबिका-

आरोहांब मया दत्तां शिबिकां रत्नभूषिताम् । अहं मदीयसहितो वहाम्येनां यथासुखम् ॥

साङ्गायै सपरिवारायै सीतायै नमः । शिबिकार्थे पुष्पं समर्पयामि ॥

इस मन्त्र से माता को शिबिका के लिए पुष्प अर्पित करे।

आन्दोलिका-

ऊर्मिलाऽऽद्यैः स्वीयजनैस्सेव्यमानाऽद्य सर्वतः ।

आन्दोलिकां ममेमां त्वमातिष्ठ कृपया मयि ॥

साङ्गायै सपरिवारायै सीतायै नमः। आन्दोलिकार्थे समर्पयामि ॥

इस मन्त्र से माता को आन्दोलिका के लिए पुष्प अर्पित करे।

तुरंग-

प्रियगतिरतितुंगो रत्नपल्याणयुक्तः कनकमयविभूषः स्निग्धगंभीरघोषः ॥

भगवति कलितोऽयं वाहनार्थे मया ते तुरगशतसमेतो वायुवेगस्तुरंगः ॥

साङ्गायै सपरिवारायै सीतायै नमः । तुरंगार्थे पुष्पं समर्पयामि ॥

इस मन्त्र से माता को तुरंग के लिए पुष्प अर्पित करे।

मातंग-

मधुकरव्रतकुंभो न्यस्तसिंदूररेणुः कनककलितघंटाकिंकिणीशोभिकंठः ।

श्रवणयुगलचंचच्चामरो मेघतुल्यो जननि तव मुदे स्तान्मत्तमातंग एषः ॥

साङ्गायै सपरिवारायै सीतायै नमः । मातंगार्थे पुष्पं समर्पयामि ॥

इस मन्त्र से माता को मातंग के लिए पुष्प अर्पित करे।

रथ-

द्रुततरतुरगैर्विराजमानं मणिमयचक्रचतुष्टयेन युक्तम् ॥

कनकमयमहं वितानयुक्तं भगवति ते हि रथं समर्पयामि ।।

साङ्गायै सपरिवारायै सीतायै नमः । रथार्थे पुष्पं समर्पयामि ॥

इस मन्त्र से माता को रथ के लिए पुष्प अर्पित करे।

सैन्य-

हयगजरथपत्तिशोभमानं दिशि दिशि दुंदुभिमेघनादयुक्तम् ॥

अपिबहुचतुरंगसैन्यमेतद्भगवति भक्तिभरेण तेऽर्पयामि ॥

साङ्गायै सपरिवारायै सीतायै नमः । सैन्यं समर्पयामि ॥

इस मन्त्र से माता को सैन्य अर्पित करे।

प्राकार-

परिधीकृतसप्तसागरं बहुसंपत्सहितं मयाऽम्बिके ।

विपुलं धरणीतलाभिधं प्रबलं दुर्गममंब तेऽर्पितम् ॥

साङ्गायै सपरिवारायै सीतायै नमः । प्राकारं समर्पयामि ॥

इस मन्त्र से माता को प्राकार अर्पित करे।

गीत-

किन्नर्यो रक्तकण्ठ्यस्ते गायन्ति चरितं सदा । गायामि रामं प्रति ते मधुरं धर्मकीर्तनम् ॥

साङ्गायै सपरिवारायै सीतायै नमः । गीतं समर्पयामि ॥

इस मन्त्र से माता के लिये उनसे संबन्धित गीत गाए अथवा गायन कराए।

नृत्य-

दृष्टवत्याऽपि मे मातारंभादिनटनं त्वया । मदीयनर्तकीवृन्द नर्तनं वीक्ष्य हृष्यताम् ॥

साङ्गायै सपरिवारायै सीतायै नमः । नृत्यं समर्पयामि ॥

इस मन्त्र से माता के लिये नृत्य करे अथवा कराए।

आरार्तिक्य-

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम् । आरार्तिकमहं कुर्वे पश्य मे वरदो भव ॥

साङ्गायै सपरिवारायै सीतायै नमः । आरार्तिक्यं समर्पयामि ॥

इस मन्त्र से माता की आरती करे।

॥ श्रीसीता जी की आरती ॥

आरति श्रीजनक दुलारी की। सीताजी रघुबर-प्यारी की ॥

जगत-जननि जगकी विस्तारिणि, नित्य सत्य साकेत विहारिणि ।

परम दयामयि दीनोद्धारिणि, मैया भक्तन हितकारी की ॥ आरति..

सतीशिरोमणि पति-हित-कारिणि, पति-सेवा-हित-वन-वन-चारिणि ।

पति-हित पति वियोग स्वीकारिणि, त्याग-धर्म-मूरति धारी की ॥ आरति..

विमल-कीर्ति सब लोकन छाई, नाम लेत पावन मति आई ।

सुमिरत कटत कष्ट दुखदायी, शरणागत-जन-भय-हारी की ॥

आरति श्रीजनक दुलारी की। सीताजी रघुबर-प्यारी की ॥

आरती लेकर हाथ धुल ले तत्पश्चात् पुष्पांजलि अर्पित करे।

मन्त्रपुष्पाञ्जलि-

श्रद्धया सिक्तया भक्त्या हार्दप्रेम्णा समर्पितः। मन्त्रपुष्पाञ्जलिश्चायं कृपया प्रतिगृह्यताम् ॥

साङ्गायै सपरिवारायै सीतायै नमः। मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

इस मन्त्र से माता को पुष्पांजलि अर्पित करे।

प्रार्थना-

उद्भवस्थितिसंहारकारिणीं क्लेशहारिणीम् । सर्वश्रेयस्करीं सीतां नतोऽहं रामवल्लभाम् ॥

दशाननविनाशाय जाता धरणिसम्भवा। मैथिली शीलसम्पन्ना पातु नः पतिदेवता ॥

रूपं देहि जयं देहि भाग्यं भगवति देहि मे । पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे ॥

इन मन्त्रों से प्रार्थना करे।

अब अपने अधिकार तथा इच्छा अनुसार जिन भी स्तोत्र आदि का पाठ करना हो वह कर ले तत्पश्चात् श्रीसीता जी की प्रदक्षिणा करे ।

प्रदक्षिणा-

मातः प्रदक्षिणीकुर्वे त्वामद्य जनकात्मजे । मम प्रदक्षिणं सर्वमायुस्सत्वं बलं कुरु ॥

साङ्गायै सपरिवारायै सीतायै नमः । प्रदक्षिणां समर्पयामि ॥

इस मन्त्र से माता की प्रदक्षिणा करे।

नमस्कार-

प्रणिपातप्रसन्नेति त्वमागस्यपि घुष्यसे । नित्यं शतापराधोऽहं वन्देऽम्ब त्वां प्रसादयन् ॥

करुणाकरचित्तायै कल्याणनिधये नमः । काकुत्स्थवल्लभायै ते कमलायै नमो नमः ॥

साङ्गायै सपरिवारायै सीतायै नमः । नमस्कारान् समर्पयामि ॥

इस मन्त्र से माता को नमस्कार करे।

वासगृह-

अथ मणिमयमंचकाभिरामे द्युतिमति पुष्पवितानराजमाने ॥

प्रसरद्गुरुधूपधूपितेऽस्मिन्भगवतिवासगृहेऽस्तु ते निवासः ॥

साङ्गायै सपरिवारायै सीतायै नमः । वास गृहं समर्पयामि ॥

इस मन्त्र से माता को वास गृह समर्पित करे।

गण्डूष जल-

अथ मातरुशीस्वासितं निजतांबूलरसेन रंजितम् ।

तपनीयमये पतद्गृहे मुखगंडूषजलं निधीयताम् ॥

साङ्गायै सपरिवारायै सीतायै नमः । गण्डूष जलं समर्पयामि ॥

इस मन्त्र से माता को गण्डूष जल अर्पित करे।

पर्यङ्क-

रत्नेन्द्रसारखचितं वह्निशुद्धांशुकान्वितम् । पुष्पचन्दनचर्चाढ्यं पर्यङ्कं देवि गृह्यताम् ॥

साङ्गायै सपरिवारायै सीतायै नमः । पर्यङ्कं समर्पयामि ॥

इस मन्त्र से माता को पर्यङ्क अर्पित करे।

अलक्तक-

तव देवि सरोजचिह्नयोः पदसनिर्जितपद्मरागयोः ।

अतिरक्ततरैरलक्तकैः पुनरुक्तां रचयामि रक्तताम् ॥

साङ्गायै सपरिवारायै सीतायै नमः । अलक्तकं समर्पयामि ॥

इस मन्त्र से माता को अलक्तक अर्पित करे।

सुखशय्या-

क्षणमथ जगदंब मंचकेऽस्मिन् मृदुतरतुलिकया विराजमाने ।

अतिरहसि मुदा रामेण सार्धं सुखशयनं कुरु मां हृदि स्मरन्ती॥

साङ्गायै सपरिवारायै सीतायै नमः । सुखशय्यां समर्पयामि ॥

इस मन्त्र से माता को शय्या अर्पित करे।

जप-

अब निम्न वर्णित मन्त्रों के द्वारा माला की वन्दना करे तत्पश्चात्

"सीतायै नमः" इस मन्त्र का कम से कम एक माला जप करे :

मां माले महामाये सर्वशक्तिस्वरूपिणि । चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव॥

अविघ्नं कुरु माले त्वं गृह्णामि दक्षिणे करे । जपकाले च सिद्धयर्थं प्रसीद मम सिद्धये ॥

अब निम्न मन्त्रों द्वारा पुनः माला की वन्दना कर उसे माथे से लगाए :

त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव । शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥

अब अपने द्वारा किये गये जप को निम्न मन्त्र के द्वारा भगवती श्रीसीता जी को समर्पित कर दे :

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥

अब माता से पूजन में हुए अपराधों के लिए क्षमा प्रार्थना करे।

अपराध क्षमापन-

विस्मृत्य मातरमपि त्वामंब विचराम्यहम् । श्रुतिं स्मृतिं च जानानोऽप्यकार्ये सततं रमे ॥

काकं तं रक्षितवतीं त्वामंब शरणं श्रये । मद्रक्षा ते भरो मातर्नोच्यतेऽतः परं मया ॥

देह्यंबाऽऽदेहमखिलं सुखं यत्कांक्षितं मम । स्वपदं प्रापयान्ते मां नमस्ते जगदंबिके ॥

इस मन्त्र से माता से पूजन में हुए अपराधों के लिए क्षमा माँगे।

समर्पण-

अब हाथ में जल लेकर **"अनेन यथाज्ञानोपचारकृतेन पूजनेन भगवती सीता प्रीयतां न मम"** यह उच्चारित कर समस्त पूजन कर्म माता सीता जी को अर्पित कर दे तथा जल छोड़ दे।

पूर्णता की प्रार्थना-

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि । यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥

इस मन्त्र से माता से पूर्णता की प्रार्थना करे तत्पश्चात् माता का विसर्जन करे।

विसर्जन-

गच्छ गच्छ जगन्मातर्गच्छ त्वां परमेश्वरि । पूजाभागं गृहाणेमं स्वस्थाने गच्छ पूजिते ॥

साङ्गायै सपरिवारायै सीतायै नमः।

विसर्जयामि, विसर्जनार्थे अक्षतान् पुष्पं च समर्पयामि ॥

इस मन्त्र से अक्षत और एक पुष्प अर्पित कर माता का विसर्जन कर दे।

अब हाथ में अक्षत लेकर निम्न मन्त्र का उच्चारण करे तत्पश्चात् उन अक्षतो को गणेश जी आदि पर छोड़कर सभी आवाहित देवताओं का विसर्जन करे :

"यान्तु देवगणाः सर्वे पूजामादाय मामकीम्। इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ॥"

अब अपने आसन का एक कोना उठा उसके नीचे दो बूंद जल डाल दे तदनन्तर उस जल से एक बार **श्री इन्द्राय नम:** और एक बार **श्री शक्राय नम:** कहकर अपने माथे पर तिलक कर ले तदनन्तर आसन से उठकर भगवती माता श्रीसीता जी के चरणामृत का पान करे ॥

अब निम्न मन्त्र से देवी का चरणोदक ग्रहण तथा शिर पर धारण करे :

अकालमृत्युहरणं सर्वव्याधिविनाशनम् । देव्याः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥

॥ इति श्रीसीता राजोपचार पूजन विधि ॥

॥ श्रीरामचरितमानस ॥

सोहति सीय राम कै जोरी । छबि सिंगारु मनहुँ एक ठोरी ॥

सखीं कहहिं प्रभुपद गहु सीता । करति न चरन परस अति भीता ॥

अर्थात्- श्रीसीताराम जी की जोड़ी ऐसी सुशोभित हो रही है मानो सुन्दरता और श्रृंगार रस एकत्र हो गये हों। सखियाँ कह रही हैं- सीते ! स्वामी के चरण छुओ; किन्तु सीता जी अत्यन्त भयभीत हुई उनके चरण नहीं छूतीं॥

दोहा- गौतम तिय गति सुरति करि नहिं परसति पग पानि ।

मन बिहसे रघुबंसमनि प्रीति अलौकिक जानि ॥

अर्थात्- गौतम जी की स्त्री अहल्या की गति का स्मरण करके सीता जी श्रीराम जी के चरणों को हाथों से स्पर्श नहीं कर रही हैं। सीता जी की अलौकिक प्रीति जानकर रघुकुलमणि भगवान् श्रीरामचन्द्र जी मन में हँसे॥

उत्सव प्रकरण

श्रीसीता नवमी पूजन

श्रीसत्योपाख्यान, उत्तरार्द्ध, अध्याय 2, श्लोक संख्या 4-6 में वर्णित है :

मासोत्तमे महापुण्ये वैशाखे माधवप्रिये। कुजवारे शुक्लपक्षे नवमी पुष्यसंयुता ॥

पृथिव्या पूजनं कृत्वा जनकस्तु नरेश्वरः । हलेन कर्षणं चक्रे सर्वेषां पश्यतां सताम् ॥

लाङ्गलस्य मुखाग्रात्तु रमाकन्या विनिर्गता। भित्वा क्षितितलं सद्यः सीतानाम्ना बभूव सा ॥

अर्थात्- जब मिथलानरेश महाराज जनक मासों में उत्तम मास महापुण्यप्रद माधवप्रिय वैशाख मास के शुक्ल पक्ष की नवमी तिथि को मंगलवार के दिन पुष्य नक्षत्र में अपने यज्ञ के लिए भूमि पूजन करके स्वर्ण निर्मित हल को भूमि पर चलाने लगे तब उस हल के अग्र भाग के पृथ्वी में लगते ही उससे साक्षात् भगवती रमा कन्या रूप में प्रगट हुईं, उनका नाम सीता हुआ॥

अतः सभी भक्तों को इस पुण्यमयी तिथि पर व्रत तथा सीता जी का पूजन करना चाहिए॥

व्रत का सङ्कल्प-

वैशाख शुक्ल नवमी के दिन प्रात:काल नित्यकर्मों से निवृत्त होकर हाथों में पुष्प, फल तथा अक्षतों सहित जल से भरा ताम्र पात्र लेकर निम्न वाक्य उच्चारित कर व्रत का सङ्कल्प करे :

अहमद्य श्रीसीताप्रीत्यर्थं श्रीसीतानवमी व्रतं करिष्ये

इस प्रकार व्रत का सङ्कल्प लेकर पात्र के जल, पुष्प और अक्षतों को किसी पात्र में छोड़ दे।

मूर्ति स्थापन-

शुद्ध भूमि पर तोरण आदि से अलंकृत सुन्दर मण्डपमें स्थापित की हुई सुन्दर चौकोर वेदिका

के ऊपर भगवती श्रीसीता जी तथा भगवान् श्रीराम जी के विग्रह अथवा चित्र की स्थापना करे। भगवती श्रीसीता जी तथा भगवान् श्रीराम जी की प्रतिमा के साथ कुलपुरोहित श्रीशतानन्द जी, महाराज श्रीजनक जी, माता श्रीसुनयना जी, हल तथा श्रीपृथ्वी देवी जी की भी स्थापना करे॥

अब पूर्वोक्त प्रकार से पवित्रीधारण, पवित्रीकरण, आचमन,आसन शुद्धिकरण तथा प्राणायाम करके निम्न वर्णित स्वस्त्ययन का पाठ करे तदुपरान्त श्रीविष्णु स्मरण कर सङ्कल्प करे॥

स्वस्त्ययन-

श्रीमन्महागणाधिपतये नमः । श्रीलक्ष्मीनारायणाभ्यां नमः । श्रीउमामहेश्वराभ्यां नमः । श्रीवाणीहिरण्यगर्भाभ्यां नमः । श्रीशचीपुरन्दराभ्यां नमः ।

श्रीमातापितृचरणकमलेभ्यो नमः । श्रीइष्टदेवताभ्यो नमः । श्रीकुलदेवताभ्यो नमः ।

श्रीग्रामदेवताभ्यो नमः। श्रीवास्तुदेवताभ्यो नमः । श्रीस्थानदेवताभ्यो नमः। श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेताय श्रीरामचन्द्राय नमः । सर्वेभ्यो देवेभ्यो नमः ।

सर्वाभ्यो देवीभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः । एतत्कर्मप्रधानदेवताभ्यो नमः ।

सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः ॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥

धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । सङ्ग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।

विद्याबलं देवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

स्मृते सकलकल्याणभाजनं यत्र जायते । पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥

सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः । देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥

विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम् ।

वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् । सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिद्धये ॥

सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः ॥

अब पूर्वोक्त प्रकार से ही श्रीविष्णु भगवान् का स्मरण कर निम्न सङ्कल्प करे :

पूजन सङ्कल्प-

विष्णु...शर्माऽहं आदि तक पूर्ववत् बोलकर फिर निम्न वर्णित अनुसार उच्चारित करे ।

“मम आत्मन: सकलाभीष्टसिद्ध्यर्थं श्रीसीता प्रीत्यर्थं च श्रीसीतापूजनं करिष्ये।”

पुनः हाथ में जल लेकर निम्न सङ्कल्प बोले :

तदङ्गत्वेन दिग्रक्षणं दीपशङ्खघण्टापूजनं निर्विघ्नतासिद्ध्यर्थं

सिद्धिबुद्धिसहितमहागणपतिपूजनं कलशस्थापनं नवग्रहपूजनं च करिष्ये ॥

दिग्रक्षण-

बाएँ हाथ में पीली सरसों लेकर उसे दाएं हाथ से आच्छादित करके निम्न मन्त्रों का पाठ करे :

अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् । सर्वेषामविरोधेन पूजाकर्म समारभे ॥

यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः । स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ॥

भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसाः । ते सर्वेऽप्यपगच्छन्तु पूजाकर्म करोम्यहम् ॥

अब उस अभिमन्त्रित सरसों को सभी दिशाओं में छिड़क दे फिर तीन बार बाईं एड़ी द्वारा पृथ्वी का ताड़न कर वाम हस्त में जल लेकर दाहिनी अनामिका से उसका नेत्रों से स्पर्श कराए।

तत्पश्चात् भैरव नमस्कार करके दीप, शङ्ख तथा घण्टा पूजन कर

सिद्धिबुद्धि के सहित भगवान् श्रीमहागणपति जी का पूजन करे।

सिद्धिबुद्धिसहित श्रीमहागणपति पूजन

सर्वप्रथम भगवान् महागणपति जी फिर उनके दोनों तरफ माता सिद्धि और माता बुद्धि की स्थापना करे। अगर इनके विग्रह अथवा चित्र न हो तो ताम्बे या मिट्टी के पात्र में कुमकुम से अष्टदल कमल बनाकर उस पात्र को चावल से ऊपर तक भर दे फिर उसपर महागणपति जी की स्थापना के लिए एक सुपारी में कलावा लपेट कर उसको स्थापित करे फिर उसके बाएँ तथा दाएँ भाग में दोनों देवियों की स्थानपा के लिये एक-एक सुपारी स्थापित करे और इन्ही पर भगवान् श्रीमहागणपति जी का श्रीसिद्धिबुद्धि जी के सहित आवाहन कर उनका पूजन करे॥

ध्यान-

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढं त्रिनेत्रं

पाशं चैवाङ्कुशाख्यं परशुमभयदं बाहुभिर्धारयन्तम्।

शक्त्या युक्तं गजास्यं पृथुतरजठरं सिद्धिबुद्धिसमेतं

रक्तं चन्द्रार्धमौलिं सकलभयहरं विघ्नराजं नमामि ॥

सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः । ध्यायामि, ध्यानार्थे पुष्पं समर्पयामि ॥

आवाहन-

एह्येहि हेरम्ब महेशपुत्र समस्तविघ्नौघविनाशदक्ष।

माङ्गल्यपूजाप्रथमप्रधान गृहाण पूजां भगवन् नमस्ते॥

सिद्धिबुद्धिसहितं श्रीमन्महागणाधिपतिम् आवाहयामि । आवाहनार्थे पुष्पं समर्पयामि ॥

आसन-

विचित्ररत्नखचितं दिव्यास्तरणसंयुतम्। स्वर्णसिंहासनं चारु गृह्णीष्व सुरपूजित ! ॥

सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः। आसनार्थे पुष्पाणि समर्पयामि ॥

इस प्रकार प्रत्येक उपचार के मन्त्र साथ **सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतिये नमः।** उच्चारित करे तथा इसके साथ ही **पाद्यं समर्पयामि॥** आदि भी पूर्ववत् ही उच्चारित करे॥

पाद्य-

सर्वतीर्थसमुद्भूतं पाद्यं गन्धादिभिर्युतम् । विघ्नराज ! गृहाणेदं भगवन् भक्तवत्सल ! ॥

अर्घ्य-

गणाध्यक्ष ! नमस्तेऽस्तु गृहाण करुणाकर ! । अर्घ्यं च फलसंयुक्तं गन्धमाल्याक्षतैर्युतम् ॥

आचमन-

विनायक ! नमस्तुभ्यं त्रिदशैरभिवन्दित ! । गङ्गोदकेन देवेश ! कुरुष्वाचमनं प्रभो ! ॥

स्नान-

मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् । तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम् ॥

दुग्ध स्नान-

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् । पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥

दधि स्नान-

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् । दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ॥

घृत स्नान-

नवनीतसमुत्पन्नं सर्वसंतोषकारकम् । घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥

मधु स्नान-

पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु । तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥

शर्करा स्नान-

इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम् । मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम् ॥

पञ्चामृत स्नान-

पयो दधि घृतं चैव मधु च शर्करान्वितम् । पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् ॥

गन्धोदक स्नान-

मलयाचलसम्भूतचन्दनेन विनिःसृतम् । इदं गन्धोदकस्नानं कुङ्कुमाक्तं च गृह्यताम् ॥

अभिषेक-

श्रीसङ्कष्टनाशन गणेश स्तोत्रम्

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् । भक्तावासं स्मरेन्नित्यमायुष्कामार्थसिद्धये ॥

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् । तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥

लम्बोदरं पञ्चमं च षष्ठं विकटमेव च । सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टमम् ॥

नवमं भालचन्द्रं च दशमं तु विनायकम् । एकादशं गणपतिं द्वादशं तु गजाननम् ॥

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः । न च विघ्नभयं तस्य सर्वसिद्धिकरं परम् ॥

विद्यार्थी लभते विद्यां धनार्थी लभते धनम् । पुत्रार्थी लभते पुत्रान् मोक्षार्थी लभते गतिम् ॥

जपेद् गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् । संवत्सरेण सिद्धिं च लभते नात्र संशयः ॥

अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् । तस्य विद्या भवेत् सर्वा गणेशस्य प्रसादतः ॥

शुद्धोदक स्नान-

शुद्धं यत्सलिलं दिव्यं गङ्गाजलसमं स्मृतम् । समर्पितं मया भक्त्या शुद्धस्नानाय गृह्यताम्॥

वस्त्र-

शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् । देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ॥

उपवस्त्र-

यस्याभावेन शास्त्रोक्तं कर्म किञ्चिन्न सिध्यति । उपवस्त्रं प्रयच्छामि सर्वकर्मोपकारकम् ॥

यज्ञोपवीत-

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् । उपवीतं मया दत्तं गृहाण परमेश्वर ॥

चन्दन-

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ ! चन्दनं प्रतिगृह्यताम् ॥

अक्षत-

अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः । मया निवेदिता भक्त्या गृहाण परमेश्वर ॥

पुष्प तथा पुष्पमाला-

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो । मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥

दूर्वा-

दूर्वाङ्कुरान् सुहरितानमृतान् मङ्गलप्रदान्। आनीतांस्तव पूजार्थं गृहाण गणनायक॥

अङ्ग पूजन-

1. गणेश्वराय नमः, पादौ पूजयामि । 2. विघ्नराजाय नमः, जानुनी पूजयामि ।

3. आखुवाहनाय नमः, ऊरू पूजयामि । 4. हेरम्बाय नमः, कटिं पूजयामि ।

5. कामारिसूनवे नमः, नाभिं पूजयामि । 6. लम्बोदराय नमः, उदरं पूजयामि ।

7. गौरीसुताय नमः, स्तनौ पूजयामि । 8. गणनायकाय नमः, हृदयं पूजयामि ।

9. स्थूलकण्ठाय नमः, कण्ठं पूजयामि । 10. स्कन्दाग्रजाय नमः, स्कन्धौ पूजयामि ।

11. पाशहस्ताय नमः, हस्तौ पूजयामि । 12. गजवक्त्राय नमः, वक्त्रं पूजयामि ।

13. विघ्नहर्त्रे नमः, ललाटं पूजयामि । 14. सर्वेश्वराय नमः, शिरः पूजयामि ।

15. गणाधिपाय नमः, सर्वाङ्गं पूजयामि ॥

सिन्दूर-

सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्धनम् । शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम्॥

परिमल द्रव्य-

अबीरं च गुलालं च हरिद्रादिसमन्वितम् । नानापरिमलद्रव्यं गृहाण परमेश्वर ॥

सुगन्धित तेल तथा इत्र-

तैलानि च सुगन्धीनि द्रव्याणि विविधानि च । मया दत्तानि लेपार्थं गृहाण परमेश्वर ॥

धूप-

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

दीप-

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश ! त्रैलोक्यतिमिरापहम् ॥

नैवेद्य-

शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च । आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम्॥

पूर्वापोशानादि-

पूर्वापोशानं समर्पयामि। मध्ये पानीयं समर्पयामि। उत्तरापोशानं समर्पयामि।

हस्तप्रक्षालनार्थं जलं समर्पयामि। मुखप्रक्षालनार्थं जलं समर्पयामि। आचमनं समर्पयामि॥

करोद्वर्तन-

चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम् । करोद्वर्तनकं देव गृहाण परमेश्वर ॥

फल-

इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

ताम्बूल-

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

दक्षिणा-

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

आरार्तिक्य-

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम् । आरार्तिकमहं कुर्वे पश्य मे वरदो भव ॥

पुष्पाञ्जलि-

नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च । पुष्पाञ्जलिर्मया दत्तं गृहाण परमेश्वर ॥

प्रदक्षिणा-

यानि कानि च पापानि जन्मान्तरकृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिण पदे पदे ॥

विशेषार्घ्य-

अब एक ताम्रपात्र में जल लेकर उसमें चन्दन, अक्षत, पुष्प तथा द्रव्य को डाल ले तदुपरान्त उसके ऊपर नारियल रख कर दोनो हाथों से ताम्र पात्र पकड़कर निम्न मन्त्रों द्वारा प्रभु को विशेषार्घ्य समर्पित करे :

रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक । भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥

द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो । वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥

अनेन सफलार्घ्येण वरदोऽस्तु सदा मम ॥

प्रार्थना-

विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥
भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय सुखदाय सुरेश्वराय ।
विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते ॥
नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः। नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥
विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे । भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ॥
लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
त्वां विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति वरप्रदेति ।
विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव ॥

अब हाथ में जल लेकर आगे वर्णित मन्त्र का उच्चारण कर
सकल पूजनकर्म भगवान् श्रीमहागणपति जी को समर्पित कर दे :

अनेन कृतपूजनेन सिद्धिबुद्धिसहितः श्रीमहागणपतिः प्रीयतां न मम ॥

॥ इति सिद्धिबुद्धिसहित श्रीमहागणपति पूजन विधि॥

कलश स्थापन-

सर्वप्रथम कलश स्थापित किये जानेवाली भूमि पर कुंकुम के द्वारा अष्टदल कमल बना ले तत्पश्चात् निम्न वर्णित विधि के अनुसार कलश स्थापित करे।

भूमि स्पर्श-

विश्वाधाराऽसि धरणि शेषनागोपरि स्थिता । उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥

इस मन्त्र से अष्टदलकमल बनाई हुई भूमि का स्पर्श करे।

यव प्रक्षेप-

यवोऽसि धान्यराजस्त्वं सर्वोत्पत्तिकरः शुभः ।

प्राणिनां जीवनोपायस्त्वां भूमौ स्थापयाम्यहम् ॥

इस मन्त्र से उस भूमि पर यव स्थापित करे। यव न हों तो अक्षत स्थापित करे।

कलश स्थापन-

हेमरूप्यादिसम्भूतं ताम्रजं सुदृढं नवम् । अच्छिद्रं धौतकल्माषं कलशं स्थापयाम्यहम् ॥

इस मन्त्र से यवों के ऊपर कलश स्थापित करे।

कलश में जलपूरण-

जीवनं सर्वजीवानां पावनं पावनात्परम् । बीजं सर्वौषधीनां च तज्जलं पूरयाम्यहम् ॥

इस मन्त्र से कलश में जल भर दे।

चन्दन प्रक्षेप-

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुगन्धाय कलशे प्रक्षिपाम्याहम् ॥

इस मन्त्र से कलश में चन्दन डाल दे।

धान्य प्रक्षेप-

धान्यौषधी मनुष्याणां जीवनं परमं स्मृतम् । बलप्रदां तु सर्वेषां कलशे प्रक्षिपाम्यहम् ॥

इस मन्त्र से कलश में धान्य डाल दे।

सर्वौषधी प्रक्षेप-

ओषध्यः सर्ववृक्षाणां तृणगुल्मलतास्तु याः । दूर्वासर्षपसंयुक्ताः कलशे ताः प्रक्षिपाम्याहम्॥

इस मन्त्र से कलश में सर्वौषधि अर्थात्- मुरा, जटामांसी, वच, कुष्ठ, शिलाजीत, हल्दी और दारूहल्दी, सटी (कचूर), चम्पक तथा मुस्ता को दूर्वा तथा सरसों सहित डाल दे।

दूर्वा प्रक्षेप-

दूर्वां ह्यमृतसम्पन्नां शतमूलां शताङ्कुराम् । शतं पातकसंहन्त्रीं कलशे प्रक्षिपाम्यहम् ॥

इस मन्त्र से कलश में दूर्वा डाल दे।

पञ्चपल्लव-

अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः । पञ्चैतान् पल्लवानस्मिन्कलशे स्थापयाम्यहम् ॥

इस मन्त्र से कलश में पञ्चपल्लव अर्थात् बरगद, गूलर, पीपल, आम और पाकड़ के पत्ते दे।

सप्तमृत्तिका-

अश्वस्थानाद्गजस्थानाद्वल्मीकात्सङ्गमाद् हृदात् ।

राजस्थानाच्च गोष्ठाच्च मृदमानीय निक्षिपेत् ॥

इस मन्त्र से कलश में सप्तमृत्तिका अर्थात् घुड़साल, हाथीसाल, बाँबी,

नदियों के संगम, तालाब, राजा के द्वार तथा गोशाला की मिट्टी डाल दे।

पूगीफल-

पूगीफलमिदं दिव्यं पवित्रं पापनाशनम् । पुत्रपौत्रादिफलदं कलशे प्रक्षिपाम्यहम् ॥

इस मन्त्र से कलश में सुपारी डाल दे।

पञ्चरत्न-

कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम् । एतानि पञ्चरत्नानि कलशे प्रक्षिपाम्यहम्॥

इस मन्त्र से कलश में पञ्चरत्न अर्थात् सोना, हीरा, मोती, पद्मराग और नीलम डाल दे।

हिरण्य-

हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदं कलशे संक्षिपाम्यहम् ॥

इस मन्त्र से कलश में स्वर्ण डाल दे।

पंचरत्नों के अभाव में आधा कर्ष अर्थात् लगभग ८ ग्राम स्वर्ण कलश में डाल दे। यदि स्वर्ण भी न हो तो गोघृत को ही डाल दे। पंचरत्नों के बाद कलश में जो स्वर्ण डाला जाता है उसके अभाव में भी गोघृत ही डाल दे ॥

कलशवेष्टनम्-

सूत्रं कार्पाससम्भूतं ब्रह्मणा निर्मितं पुरा । येन बद्धं जगत्तेन कलशं वेष्टयाम्यहम् ॥

इस मन्त्र से कलश को कण्ठ में रक्त सूत्र से वेष्टित करे।

कलश के ऊपर धान्य से भरा हुआ पूर्णपात्र स्थापित करे-

पिधानं सर्ववस्तूनां सर्वकार्यार्थसाधनम् । सम्पूर्णः कलशो येन पात्रं तत्कलशोपरि ॥

इस मन्त्र से धान्य से भरे हुए पूर्णपात्र को कलश के ऊपर स्थापित करे।

पूर्णपात्र के ऊपर नारियल रखे-

श्रीफलं तु शुभं प्रोक्तं सर्वकार्यप्रसाधनम् । लक्ष्मीदं फलदं शुद्धं कलशे स्थापयाम्यहम् ॥

इस मन्त्र से कलश के ऊपर लाल कपड़ा तथा कलावा लपेटे हुए नारियल को रखे।

अब कलश में निम्न विधि से श्रीवरुण देव जी का पञ्चोपचारों से पूजन करे।

वरुण देव का आवाहन-

मकरस्थं पाशहस्तमम्भसां पतिमीश्वरम् । आवाहये प्रतीचीशं वरुणं यादसां पतिम् ॥

अपाम्पतये वरुणाय नमः । अस्मिन् कलशे वरुणं साङ्गं

सपरिवारं सायुधं सशक्तिकं आवाहयामि, स्थापयामि ॥

अब निम्न मन्त्रों के द्वारा वरुण देव का पूजन करे :

अपाम्पतये वरुणाय नमः । चन्दनं समर्पयामि ॥

अपाम्पतये वरुणाय नमः । पुष्पं पुष्पमालां च समर्पयामि ॥

अपाम्पतये वरुणाय नमः । धूपमाघ्रापयामि ॥

अपाम्पतये वरुणाय नमः। दीपं दर्शयामि ॥

अपाम्पतये वरुणाय नमः । नैवेद्यं निवेदयामि ॥

अब अनामिका अँगुली से कलश का स्पर्श करते हुए निम्न मन्त्रों के द्वारा कलश में तीर्थों आदि का आवाहन करे :

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।

मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥

अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः। अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ॥

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥

अब निम्न वर्णित विधि से वरुणादि आवाहित देवताओं का पूजन करे-

वरुणाद्यावाहितदेवताभ्यो नमः। आसनार्थे अक्षतान् समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः । पादयोः पाद्यं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। हस्तयोः अर्घ्यं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। आचमनं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। स्नानं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। स्नानान्ते आचमनं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। पञ्चामृतस्नानं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः । गन्धोदकस्नानं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। शुद्धोदकस्नानं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः । शुद्धोदकस्नानान्ते आचमनं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। वस्त्रं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। वस्त्रान्ते आचमनं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। यज्ञोपवीतं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। यज्ञोपवीतान्ते आचमनं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। उपवस्त्रं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। उपवस्त्रान्ते आचमनं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। चन्दनं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। अक्षतान् समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। पुष्पं पुष्पमालां च समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः । नानापरिमलद्रव्याणि समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। सुगन्धि द्रव्यं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। धूपमाघ्रापयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। दीपं दर्शयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। नैवेद्यं निवेदयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। पूर्वापोशानं समर्पयामि। मध्ये पानीयं समर्पयामि।

उत्तरापोशानं समर्पयामि। हस्तप्रक्षालनार्थं जलं समर्पयामि।

मुखप्रक्षालनार्थं जलं समर्पयामि। आचमनं समर्पयामि॥

वरुणाद्यावाहितदेवताभ्यो नमः। करोद्वर्तनं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। ताम्बूलं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। कृतायाः पूजायाः षाड्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः । आरार्तिक्यं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। पुष्पाञ्जलिं समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। प्रदक्षिणां समर्पयामि ॥

वरुणाद्यावाहितदेवताभ्यो नमः। नमस्कारान् समर्पयामि ॥

अब निम्न मन्त्रों से कलश की प्रार्थना करे :

देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥

त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।

त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥

शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥

त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ।

सांनिध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥

नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ।

सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥

अब हाथ में जल लेकर निम्न वाक्य का उच्चारण कर समस्त पूजन कर्म वरुण देव को समर्पित कर दे फिर जल छोड़ दे :

अनेन अस्मद्कृतेन कलशे पूजनाख्येनकर्मणा वरुणाद्यावाहितदेवताः प्रीयन्तां न मम ॥

॥ इति श्री कलश स्थापन विधि ॥

नवग्रह पूजन

ग्रहों की स्थापना के लिये एक चौकी पर निम्न चित्र के अनुसार चार खड़ी पाइयों और चार पड़ी पाइयों का चौकोर मण्डल बनाये। इस प्रकार नौ कोष्ठक बन जायेंगे। तत्पश्चात् बीच वाले कोष्ठक में सूर्य, अग्नि कोण में चन्द्र, दक्षिण में मंगल, ईशान कोण में बुध, उत्तर में बृहस्पति, पूर्व में शुक्र, पश्चिम में शनि, नैर्ऋत्य कोण में राहु और वायव्य कोण में केतु की चित्र में लिखे रंगों तथा बने आकारों के अनुरूप रंग के आकार बना स्थापना करे।



अब निम्न वर्णित मन्त्रों के द्वारा नवग्रहों का आवाहन कर उनका पूजन करे।

सूर्य (मध्य में, लाल गोलाकार)

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् । तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥

कलिङ्गदेशोद्भव काश्यपगोत्र रक्तवर्ण भो सूर्य ! इहागच्छ, इह तिष्ठ

सूर्याय नमः। सूर्यमावाहयामि, स्थापयामि ॥

चन्द्र (अग्निकोण में, श्वेत चतुष्कोण)

दधिशङ्खतुषाराभं क्षीरोदार्णवसंभवम् । नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम् ॥

यमुनातीरोद्भव आत्रेयगोत्र शुक्लवर्ण भो सोम ! इहागच्छ, इह तिष्ठ

सोमाय नमः। सोममावाहयामि, स्थापयामि ॥

मङ्गल (दक्षिण में, लाल त्रिकोण)

धरणीगर्भसंभूतं विद्युत्कान्तिसमप्रभम् । कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ॥

अवन्तिदेशोद्भव भारद्वाजगोत्र रक्तवर्ण भो भौम ! इहागच्छ, इह तिष्ठ

भौमाय नमः । भौममावाहयामि, स्थापयामि ॥

बुध (ईशानकोण में, हरा बाण)

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् । सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥

मगधदेशोद्भव आत्रेयगोत्र पीतवर्ण भो बुध ! इहागच्छ, इह तिष्ठ

बुधाय नमः । बुधमावाहयामि, स्थापयामि ॥

बृहस्पति (उत्तर में, पीला दीर्घचतुरस्र)

देवानां च ऋषीणां च गुरुं काञ्चनसंनिभम् । बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥

सिन्धुदेशोद्भव आङ्गिरसगोत्र पीतवर्ण भो गुरो ! इहागच्छ, इह तिष्ठ

बृहस्पतये नमः । बृहस्पतिमावाहयामि, स्थापयामि ॥

शुक्र (पूर्व में, श्वेत पञ्चकोण)

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् । सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥

भोजकटदेशोद्भव भार्गवगोत्र शुक्लवर्ण भो शुक्र ! इहागच्छ, इह तिष्ठ

शुक्राय नमः। शुक्रमावाहयामि, स्थापयामि ॥

शनि (पश्चिम में, काला धनुष)

नीलांजनसमाभासं रविपुत्रं यमाग्रजम् । छायामार्तण्डसंभूतं तं नमामि शनैश्चरम् ॥

सौराष्ट्रदेशोद्भव काश्यपगोत्र कृष्णवर्ण भो शनैश्चर ! इहागच्छ, इह तिष्ठ

शनैश्चराय नमः। शनैश्चरमावाहयामि, स्थापयामि ॥

राहु (नैर्ऋत्यकोण में, काला सूर्पाकार)

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् । सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम् ॥

राठिनपुरोद्भव पैठीनसगोत्र कृष्णवर्ण भो राहो ! इहागच्छ, इह तिष्ठ

राहवे नमः। राहुमावाहयामि, स्थापयामि ॥

केतु (वायव्यकोण में, कृष्ण ध्वजा)

पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् । रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥

अन्तर्वेदिसमुद्भव जैमिनिगोत्र धूम्रवर्ण भो केतो ! इहागच्छ, इह तिष्ठ

केतवे नमः। केतुमावाहयामि, स्थापयामि ॥

अब **"आवाहितसूर्यादिनवग्रहेभ्यो देवेभ्यो नमः"** इस मन्त्र

से नवग्रहों का पञ्चोपचार आदि के द्वारा पूजन करे।

अब निम्न मन्त्रों द्वारा प्रार्थना करे:

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।

गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मङ्गलं मङ्गलः

सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ।

राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं नित्यं

प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ॥

अब हाथ में जल लेकर **"अनया पूजया सूर्यादिनवग्रहाः प्रीयन्तां न मम"**

यह वाक्य उच्चारित कर सकल पूजन कर्म नवग्रहों को समर्पित कर दे॥ **नारायण..**

॥ इति श्रीनवग्रह पूजन ॥

श्रीसीता नवमी पूजन

निम्न वर्णित मन्त्र से भगवती श्रीसीता जी का ध्यान कर उनका आवाहन करे :

ध्यान-

ताटङ्कमण्डलविभूषितगण्डभागां चूडामणिप्रभृतिमण्डनमण्डिताङ्गीम्।

कौशेयवस्त्रमणिमौक्तिकहारयुक्तां ध्यायेद् विदेहतनयां शशिगौरवर्णाम् ॥

साङ्गायै सपरिवारायै जनकसुनयनाशतानन्दादिसहितायै श्रीरामसहितायै सीतायै नमः।

ध्यायामि, ध्यानार्थे पुष्पं समर्पयामि ॥

'मण्डलाकार कर्णाभूषणों से जिनके कपोल अति सुन्दर लग रहे हैं, चूड़ामणि आदि अनेकविध आभूषणों से जिनके विभिन्न अङ्ग अलंकृत हैं, जो रेशमी वस्त्र तथा मणि एवं मोती के हारों से विभूषित हैं और जिनका चन्द्रमा के समान गौरवर्ण है, उन जनकात्मजा भगवती सीता का ध्यान करना चाहिये। इस प्रकार माता श्रीसीता जी का ध्यान करके उन्हें एक पुष्प अर्पित करे।

आवाहन-

आवाहये त्वां पूजार्थं जनकेश्वरपुत्रिके । भर्तृपार्श्वगताऽपि त्वमत्र सन्निहिता भव ॥

साङ्गं सपरिवारं जनकसुनयनाशतानन्दसहितं श्रीरामसहितं सीतामावाहयामि,

आवाहनार्थे पुष्पं समर्पयामि ॥

अब निम्न मन्त्रों से हल देवता तथा पृथ्वी देवी का भी आवाहन करे।

श्रीहल देवाय नमः । आवाहयामि॥

श्रीपृथ्वि देव्यै नमः । आवाहयामि॥

अब भगवती का पूर्वोक्त प्रकार से नृत्यार्पण पर्यंत पूजन करे। हर उपचार के मंत्र के साथ मूल

मन्त्र के रूप में **"साङ्गायै सपरिवारायै जनकसुनयनाशतानन्दादिसहितायै श्रीरामसहितायै सीतायै नमः।"** इसका उच्चारण करे।

अब निम्न विधि के अनुसार जनक जी आदि का पूजन करे :

श्रीजनक पूजन-

देवी पद्मालया साक्षादवतीर्णा यदालये। मिथिलापतये तस्मै जनकाय नमो नमः ॥

'जिनके गृह में साक्षात् लक्ष्मी देवी ही उत्पन हुई थीं, उन

मिथिलापति श्रीजनक जी के लिये बारंबार नमस्कार है।'

उपर्युक्त मन्त्र से महाराज श्रीजनक जी की वन्दना करके

"श्रीजनकाय नमः" इस मन्त्र से उनका पञ्चोपचार पूजन करे।

श्रीसुनयनाम्बा पूजन-

सीताया जननी मातर्महिषी जनकस्य च। पूजां गृहाण मद्दत्तां महाबुद्धे नमोऽस्तु ते॥

'मात: ! आप श्रीसीता जी की माता तथा महाराज जनक की पटरानी हैं,

मेरे द्वारा की हुई इस पूजा को ग्रहण करें। महाबुद्धे ! आपको प्रणाम है

उपर्युक्त मंत्र से श्रीसुनयना जी की वंदना करके **"श्रीसुनयनाम्बायै नमः"** इस मन्त्र से उनका पञ्चोपचारों द्वारा पूजन सम्पन्न करे तत्पश्चात् शतानन्द जी का पूजन करे।

श्रीशतानन्द पूजन-

निधानं सर्वविद्यानां विद्वत्कुलविभूषणम् । जनकस्य पुरोधास्त्वं शतानन्दाय ते नमः ॥

'शतानन्दजी! आप सभी विद्याओं के आगार, विद्वत्शिरोमणि

एवं श्रीजनक जी के पुरोहित हैं। आपको नमस्कार है।'

उपर्युक्त मन्त्र से श्रीशतानन्द जी की वन्दना करके **“श्रीशतानन्दाय नमः”**

इस मन्त्र से श्रीशतानन्द जी का पञ्चोपचारों द्वारा पूजन सम्पन्न करे।

श्रीहल पूजन-

जीवयस्यखिलं विश्वं चालयन् वसुधातलम् । प्रादुर्भावयसे सीतां सीर तुभ्यं नमोऽस्तु ते ॥

'हे हल! पृथ्वी को जोतते समय तुमने सीता जी को प्रकट किया है

एवं सम्पूर्ण विश्व का तुम्हारे द्वारा पोषण होता है। तुम्हें नमस्कार है।'

उपर्युक्त मन्त्र से श्रीहल की वन्दना करके **“श्रीहलाय नमः”**

इस मन्त्र से हल देवता का पञ्चोपचारों द्वारा पूजन करे।

श्रीपृथ्वी देवी पूजन-

त्वयैवोत्पादितं सर्वं जगदेतच्चराचरम् । त्वमेवासि महामाया मुनीनामपि मोहिनी ॥

त्वदायत्ता इमे लोकाः श्रीसीतावल्लभा परा । वन्दनीयासि देवानां सुभगे त्वां नमाम्यहम् ॥

'पृथ्वी मातः ! यह सम्पूर्ण चराचर जगत् आपसे ही उत्पन्न हुआ है। आप ही मुनियों को भी मोहित करनेवाली महामाया हैं। ये सभी लोक आपके अधीन हैं। आप पराशक्ति हैं एवं सीता जी आपको परमप्रिय हैं। आप देवों के लिये भी वन्दनीया हैं। सुभगे ! मैं आपको नमस्कार करता हूँ।'

इस प्रकार श्रीपृथ्वी देवी की वन्दना करके **“श्रीसुभगायै नमः”**

इस मन्त्र से धरती माता का पञ्चोपचारों के द्वारा पूजन करे।

अब पूर्ववत् ही आरती करके पुष्पांजलि अर्पित करे तत्पश्चात्

प्रार्थना करके स्तोत्र पाठ कर प्रदक्षिणा आदि सब पूर्ववत् ही करे।

इस प्रकार सीता नवमी के दिन श्रीसीता जी का पूजन करे तथा रात्रि में कीर्तन आदि करते हुए जागरण करे फिर अगले दिन स्नान आदि करके नित्य कर्मों को सम्पन्न कर सीता माता का पूजन करे फिर ब्राह्मणों तथा सुहागिनी स्त्रियों को भोजन कराकर उन्हें दक्षिणा तथा वस्त्राभूषण आदि देकर व्रत की पारणा करे॥

॥ इति श्रीसीता नवमी पूजन विधि ॥

श्रीभावार्थ रामायण के बालकाण्ड के अनुसार एक बार भगवान् श्रीपरशुराम जी राजा जनक के गृह में भोजन के लिए आए तब उन्होंने भोजन के लिए जाने से पूर्व शिव जी द्वारा प्रदान करा गया धनुष महल में ही एक जगह रख दिया। जब परशुराम जी भोजन कर रहे थे तब उस धनुष के पास सीता माता आईं और उन्होंने उस धनुष को घोड़ा समझा तथा वे धनुष को घोड़ा, बाण को चाबुक और उसकी डोरी को लगाम समझकर उससे खेलने लगीं और उस शिव धनुष को उस स्थान से दूर ले गईं। जब भगवान् परशुराम जी भोजन करके आए और उन्होंने धनुष को उसके स्थान पर नही पाया तो वे राजा जनक पर अत्यन्त क्रोधित हुए तब जनक जी ने धनुष की खोज कराई तथा स्वयं भी खोजने लगे। तब उन्होंने देखा कि सीता जी उससे खेल रहीं हैं, तब वे सीता माता तथा धनुष को लाने लगे परंतु वह पिनाक धनुष उनसे नही उठा। तब उन्होंने श्रीसीता जी से कहा कि पुत्री ! इस धनुष को ले चलो तब श्रीसीता माँ उस धनुष को घोड़े ऐसा चलाती हुईं परशुराम जी के पास ले आईं। यह देख श्रीपरशुराम जी श्रीजनक जी से बोले- ये तो साक्षात् आदिशक्ति हैं, इनका विवाह तो स्वयं परमेश्वर से ही होगा। हे जनक ! मैं यह धनुष तुम्हे देता हूँ। तुम इनका विवाह उसी से कराना जो इस धनुष पर डोरी चढ़ा सके, यह हमारी आज्ञा है॥

स्तोत्र प्रकरण

श्रीसीतानमस्कार स्तोत्रम्

एकदा नैमिषारण्ये शौनकाद्याः महर्षयः । नारदं परिपप्रच्छ कथां परमपावनीम् ॥

कथयस्व महाबाहो स्तवञ्चपरमं पदं । यस्य श्रवण मात्रेण सर्वपापैः प्रमुच्यते ॥

श्रीनारद उवाच-

सीतास्तोत्रं प्रवक्ष्यामि सर्वपापप्रणाशनम् ॥

सीता च जानकीदेवी मैथिली राघवप्रिया नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

लोकमाता जगद्धात्री कुशस्य जननी शुभा नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

वैदेही वेदमाता च सावित्री भुवनेश्वरी नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

रामस्य महिषी पुण्या सर्वपापप्रणाशिनी नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

अयोनिजा महाविद्या महापातकनाशिनी नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

नमस्तस्यै नमस्तस्यै सीतायै च नमो नमः। इदं स्तोत्रं महत्पुण्यं प्रातरुत्थाय यः पठेत् ॥

सर्वपापविमुक्तात्मा विष्णुलोकं स गच्छति। पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ॥

मोक्षार्थी लभते मोक्षं कन्याविन्दति सत्पतिम्। तस्यगृहे सदा लक्ष्मी कर्हिचिन्नैव मुञ्चति ॥

दातव्यं भक्तियुक्ताय शिष्याय विमलात्मने। दाम्भिकाय न दातव्यं भक्तिहीनाय सर्वथा ॥

गोपनीयमिदंस्तोत्रं त्रिषुलोकेषु सर्वदा ॥

॥ इति श्रीरुद्रयामले शिव-भैरव संवादे श्रीसीतानमस्कारस्तोत्रं सम्पूर्णम् ॥

श्रीरत्नसिंहासनीय श्रीसीतापञ्चायतन स्तोत्रम्

वन्दे विदेहतनयापदपुण्डरीकं कैशोरसौरभसमाहृतयोगिचित्तम् ।

हन्तुं त्रितापमनिशं मुनिहंससेव्यं सम्मानशालिपरिपीतपरागपुञ्जम् ॥ १ ॥

दूर्वादलद्युतितनुं तरुणाब्जनेत्रं हेमाम्बरंवरविभूषणभूषिताङ्गम् ।

कन्दर्पकोटिकमनीयकिशोरमूर्तिं पूर्तिं मनोरथभुवांभजजानकीशम् ॥ २ ॥

कर्पूरगौरवपुषं शरदिन्दुवक्त्रं नीलाम्बरं सरसिजाक्षमनन्तमाद्यम् ।

वामोर्मिलं ललितभूषणभूषिताङ्ग रामानुजं भजमनोऽभयदं निजानाम् ॥ ३ ॥

विश्वम्भरं भरतमम्बुजपत्रनेत्रं नीलाम्बुदामवपुषं कनकाभवस्त्रम् ।

भक्ताभयप्रदमनेकविभूषणाढ्यं जाड्यापहं सुभजतां भजमाण्डवीशम् ॥ ४ ॥

कैशोरमूर्तिमनुरूपमनूपरूपं पञ्चेषु सुन्दरतनुं श्रुतिकीर्तिकान्तम् ।

गौरं सुवर्णमणिभूषणमम्बुजाक्षं पीताम्बरं भजमनोऽखिल सिद्धिहेतुम् ॥ ५ ॥

उद्यद्दिनेशकररञ्जितकञ्जवक्त्रं पिङ्गारुणाब्जनयनं नयनाभिरामम् ।

सौवर्णवर्णवसनं रत्नादिभूषं भक्तेष्टकामदतरुं भज वायुसूनुम् ॥ ६ ॥

श्री सीतापञ्चायतनस्तोत्रं प्रातःकाले पठेत्तुयः ।

इहलोके परेवाऽपि तस्य किञ्चिन्नदुर्लभम् ॥७॥

॥ इति सुन्दरीतन्त्रोक्तं श्रीरत्नसिंहासनीय श्रीसीतापञ्चायतन स्तोत्रम् ॥

श्रीसीता अष्टोत्तरशतनामस्तोत्रम्

विनियोग:-

अस्य श्रीसीतानामाष्टोत्तरमन्त्रस्य अगस्तिऋषिः। अनुष्टुप्छन्दः । रमेति बीजम्।

मातुलुङ्गीति शक्तिः। पद्माक्षजेति कीलकम्। अवनिजेत्यस्त्रम्।

जनकजेति कवचम्। मूलकासुरमर्दिनीति परमो मन्त्रः।

श्रीसीतारामचन्द्रप्रीत्यर्थं सकलकामनासिद्ध्यर्थं जपे विनियोगः।

ध्यान-

वामाङ्गे रघुनायकस्य रुचिरे या संस्थिता शोभना

या विप्राधिपयानरम्यनयना या विप्रपालानना ।

विद्युत्पुञ्जविराजमानवसना भक्तार्तिसंखण्डना

श्रीमद्राघवपादपद्मयुगलन्यस्तेक्षणा सावतु॥

जो एक सुन्दर सिंहासन पर श्रीराम जी के वामाङ्ग में आसीन (विराजित) हैं, मृग के नेत्रों की तरह जिनके सुन्दर नेत्र हैं, जो चन्द्रमा के तुल्य मुखवाली हैं, जो बिजली के समूह की तरह दमकने वाले वस्त्र पहने हुए हैं, जो अपने भक्तों की पीड़ा दूर करने में कुछ उठा नहीं रखतीं, जिनके नेत्र श्रीरामचन्द्र जी के युगल चरण-कमलों में लगे हैं, वे सीता जी हमारी रक्षा करें।

स्तोत्र-

श्रीसीता जानकी देवी वैदेही राघवप्रिया । रमावनिसुता रामा राक्षसान्तप्रकारिणी ॥

रत्नगुप्ता मातुलुङ्गी मैथिली भक्ततोषदा । पद्माक्षजा कञ्जनेत्रा स्मितास्या नूपुरस्वना ॥

वैकुण्ठनिलया मा श्रीर्मुक्तिदा कामपूरणी । नृपात्मजा हेमवर्णा मृदुलाङ्गी सुभाषिणी ॥

कुशाम्बिका दिव्यदा च लवमाता मनोहरा । हनुमद्वन्दितपदा मुग्धा केयूरधारिणी ॥

अशोकवनमध्यस्था रावणादिकमोहिनी । विमानसंस्थिता सुभ्रूः सुकेशी रशनान्विता ॥

रजोरूपा सत्त्वरूपा तामसी वह्निवासिनी । हेममृगासक्तचित्ता वाल्मीक्याश्रमवासिनी ॥

पतिव्रता महामाया पीतकौशेयवासिनी । मृगनेत्रा च बिम्बोष्ठी धनुर्विद्याविशारदा ॥

सौम्यरूपा दशरथस्नुषा चामरवीजिता । सुमेधादुहिता दिव्यरूपा त्रैलोक्यपालिनी ॥

अन्नपूर्णा महालक्ष्मीर्धीर्लज्जा च सरस्वती ।

शान्तिः पुष्टिः क्षमा गौरी प्रभायोध्यानिवासिनी ॥

वसन्तशीतला गौरी स्नानसन्तुष्टमानसा । रमानामभद्रसंस्था हेमकुम्भपयोधरा ॥

सुरार्चिता धृतिः कान्तिः स्मृतिर्मेधा विभावरी । लघूदरा वरारोहा हेमकङ्कणमण्डिता ॥

द्विजपत्न्यर्पितनिजभूषा राघवतोषिणी । श्रीरामसेवनरता रत्नताटङ्कधारिणी ॥

रामवामाङ्गसंस्था च रामचन्द्रैकरञ्जनी । सरयूजलसंक्रीडाकारिणी राममोहिनी ॥

सुवर्णतुलिता पुण्या पुण्यकीर्तिः कलावती । कलकण्ठा कम्बुकण्ठा रम्भोरुर्गजगामिनी ॥

रामार्पितमना रामवन्दिता रामवल्लभा । श्रीरामपदचिह्नाङ्का रामरामेतिभाषिणी ॥

रामपर्यङ्कशयना रामाङ्घ्रिक्षालिनी वरा । कामधेन्वन्नसन्तुष्टा मातुलुङ्गकरे धृता ॥

दिव्यचन्दनसंस्था श्रीर्मूलकासुरमर्दिनी । एवमष्टोत्तरशतं सीतानाम्नां सुपुण्यदम् ॥

ये पठन्ति नरा भूम्यां ते धन्याः स्वर्गगामिनः। अष्टोत्तरशतं नाम्नां सीतायाः स्तोत्रमुत्तमम् ॥

जपनीयं प्रयत्नेन सर्वदा भक्तिपूर्वकम् । सति स्तोत्राण्यनेकानि पुण्यदानि महान्ति च ॥

नानेन सदृशानीह तानि सर्वाणि भूसुर । स्तोत्राणामुत्तमं चेदं भुक्तिमुक्तिप्रदं नृणाम् ॥

एवं सुतीक्ष्ण ते प्रोक्तमष्टोत्तरशतं शुभम् । सीतानाम्नां पुण्यदं च श्रवणान्मङ्गलप्रदम् ॥

नरैः प्रातः समुत्थाय पठितव्यं प्रयत्नतः । सीतापूजनकालेऽपि सर्ववाञ्छितदायकम् ॥

॥ इति श्रीआनन्दरामायणे श्रीसीताष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

श्रीसीताकृपाकटाक्ष स्तोत्रम्

मुनीन्द्र वृन्दवन्दिते त्रिलोकशोक हारिणि, प्रसन्नवक्त्र पङ्कजे निकुञ्ज भूविलासिनि।
विदेह भूपनन्दिनि नृपेन्द्रसूनु संगते, कदाकरिष्यसीह मां कृपाकटाक्ष भाजनम् ॥१॥

अशोकवृक्षवल्लरीवितानमण्डपस्थिते, प्रवालजालपल्लवप्रभारुणाङ्घ्रि कोमले ।
वराभयस्फुरत्करे प्रभूतसम्पदालये, कदाकरिष्यसीह मां कृपाकटाक्ष भाजनम्॥२॥

तडित्सुवर्ण चम्पक प्रदीप्त गौरविग्रहे, मुखप्रभापरास्त कोटि शारदेन्दु मण्डले।
विचित्र चित्र सञ्चरच्चकोर शाव लोचने, कदाकरिष्यसीह मां कृपाकटाक्ष भाजनम्॥३॥

अनङ्गरङ्गमङ्गलप्रसङ्गभङ्गुरध्रुवां, सुविभ्रमस्तु सम्भ्रमद् दृगन्तबाणपातनैः।
निरन्तरं वशीकृतावधेशभूपनन्दने, कदाकरिष्यसीह मां कृपाकटाक्ष भाजनम्॥४॥

मदोन्मदादियौवने प्रमोदमानमण्डिते, प्रियानुरागरञ्जिते कलाविलासपण्डिते।
अनन्यधन्यकुञ्जराजि कामकेलिकोविदे, कदाकरिष्यसीह मां कृपाकटाक्ष भाजनम्॥५॥

विशेषहावभाव धीरहीरहारभूषिते, प्रभूतशात कुम्भ-कुम्भ कुम्भि कुम्भ सुस्तनि ।
